दिनाङ्क:-04.12.2025

प्रात: - 06:55

## द्विदिवसीय यात्रायां राष्ट्रपतिः

रूस-देशस्य राष्ट्रपतिः व्लादिमिर् पुतिनः अद्य त्रयोविंशतितमे भारत-रशिया वार्षिकसम्मेलने भागं ग्रहणाय भारतम् आगमिष्यति। द्विदिवसीय यात्रायां राष्ट्रपतिः पुतिनः नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं करिष्यति। उभौ नेतारौ परस्पर-हितानां क्षेत्रीय-वैश्विक-विषयेषु विचार विनिमयं करिष्यतः। व्यापारेण, अर्थव्यवस्थया, स्वास्थ्यसेवया, शिक्षया, संस्कृत्या, प्रसारमाध्यमैः च सम्बद्धानाम् अनेकेषु सन्धिपत्रेषु हस्ताक्षराणां अपेक्षास्ति। राष्ट्रपतिः द्रौपदीमुर्मुः अपि रूस-देशस्य राष्ट्रपतेः सम्माने भोजस्य आयोजनं करिष्यति।

## सिन्धिया - सञ्चार्-साथी

सञ्चार्-साथी- चलदूरभाषीय तन्त्रान्शस्य वर्धमानस्य स्वीकार्यता दृष्ट्या, सर्वकारेण दूरवाण्याः निर्मातृभ्यः अस्य तन्त्रान्शस्य पूर्वस्थापनम् अनिवार्यं न कर्तुं निर्णयः कृतः अस्ति। सर्वकारेण स्पष्टीकृतम् यत् नागरिकाः यदा इच्छन्ति तदा तन्त्रान्शं निष्कासयितुं शक्नुवन्ति तथा च तन्त्रान्शे उपयोक्तृणां रक्षणम् अतिरिच्य अन्यत् किमपि कार्यं नास्ति इति। सञ्चारमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् अद्यावधि चत्वारि दशमलवोत्तर एक कोटिजनाः उपयोक्तारः सञ्चार साथी तन्त्रान्शं स्थापितवन्तः। केन्द्रीय-सञ्चार-मन्त्री ज्योतिरादित्य-सिन्धिया ह्यः विपक्षस्य गूढचर्यायाः आरोपान् निराकृतवान्, सः अवदत् यत् सञ्चार्-साथी-ऐप-द्वारा गूढचर्या न सम्भवः, न भविष्यतीति। ह्यः लोकसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरे श्री सिन्धिया-वर्यः स्पष्टं कृतवान् यत् उपयोक्तारः स्वसौख्येन पञ्जीकरणं कृत्वा अस्य लाभान् प्राप्तुं ऐप-इत्येतं सक्रियं कर्तुं शक्नुवन्ति, तथा च ते कदापि स्वस्य उपकरणात् तत् निष्क्रियं निष्कासयितुं वा शक्नुवन्ति। सः अवदत् यत्, नरेन्द्रमोदिनः प्रशासनेन नागरिकान् कपटक्रियाकलापात् रक्षितुं एषा सुविधा प्रदत्तास्ति।

## ज्ञानेश आइडिया

मुख्य-निर्वाचन-आयुक्तः ज्ञानेश कुमारः षड्विंशत्यधिक द्विसहस्रतमवर्षस्य अन्ताराष्ट्रिय-लोकतन्त्र-निर्वाचन-सहायता-परिषदः अध्यक्षः अभवत्। भारतं षड्विंशत्यधिक द्विसहस्रतमे वर्षे अन्ताराष्ट्रिय-लोकतन्त्र-निर्वाचन-सहायता-परिषदः सदस्यराष्ट्राणां नूतनः अध्यक्षः निर्वाचितः । अस्य सङ्घटनस्य चतुर्दश सदस्य-देशेषु भारतं अन्यतमम् अस्ति। स्वीडन्-देशस्य स्टाक्होम्-नगरे श्री-कुमारः अध्यक्षपदम् अङ्गीकृतवान्। स्वस्य स्वीकृति-भाषणे श्रीकुमारः भारतस्य लोकतान्त्रिक-अभ्यासस्य परिमाणम् उद्घाटितवान्।

राजनाथसिंहः

रक्षामंत्री राजनाथसिंहः रुसदेशस्य रक्षामंत्री आंद्रेई बेलोसोवः च अद्य नवदिल्ल्यां सैन्य-तन्त्रज्ञान-सहकारविषये द्वाविंशतितमे भारत-रूस-अन्ता-शासकीय-आयोगस्य मन्त्रिस्तरीय-सभायाः सह-अध्यक्षतां करिष्यतः। रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् उभौ उपवेशनावधौ उभयदेशयोः रक्षाक्षेत्रे बहु-पक्षीय-सम्बन्धस्य समग्र-श्रेण्याः समीक्षां करिष्यतः।

सिन्धिया- नागालैण्ड्

केन्द्रीय-पूर्वोत्तर-क्षेत्र-विकास-मन्त्री ज्योतिरादित्य-सिन्धिया अद्यारभ्य नागालैण्ड्-राज्यस्य त्रिदिवसीय यात्रायां भविष्यति। स्वस्य प्रवासावधौ, सिन्धिया शुक्रवासरे तौफेमा-ग्रामे आयोक्ष्यमाणस्य हार्न्बिल्-उत्सवस्य भागरूपेण आयोजिते पारम्परिक-शिलाप्रक्षेप-समारोहे भागं ग्रहीष्यति। सः अनेकाषां मन्त्रालय-परियोजनानाम् उद्घाटनं शिलान्यासं च विधाष्यति।

बालविवाहमुक्तभारतस्य

महिला-बालविकासमन्त्री अन्नपूर्णा देवी अद्य नवदिल्ल्यां बालविवाहमुक्तभारतस्य कृते शत-दिवसीय-जागृति-अभियानस्य औपचारिकरूपेण आरम्भं करिष्यति, यत् 'बाल विवाह मुक्तभारत'

अभियास्य एकवर्ष-पूर्त्यावसरे आचर्यते। अस्य अभियानस्य माध्यमेन, महिला-बाल-विकास-मन्त्रालयः सम्पूर्णे देशे सर्वेषां आवाहनं करोति यत् ते अस्मिन् आन्दोलने सम्मिलिताः भवेयुः तथा च बालविवाह-मुक्तभारतस्य निर्माणार्थं भारतस्य प्रतिबद्धतां पुनः दृढीकुर्वन्तु इति।

क्रिकेट

पुरुष-क्रिकेट-क्रीडायां, रायपुर-नगरस्य शहीद – वीर – नारायण – सिंह –अन्ताराष्ट्रिय - क्रीडाङ्गणे तिसृषु – एकदिवसीय – क्रीडा -शृङ्खलाषु द्वितीयायां क्रीडायां दक्षिण - आफ्रिका - दलेन भारतम् चतु: स्तौभै: पराजितम् ।